# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवेम्बर-दिसम्बर, २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्रिद्वितीयवर्षम् (SEM-3) | **प्रश्नपत्रम् – ६** | गुणाः - ७० |
| विषयः – फलितज्योतिषम् | **कोड – C.C.2.3.6** | समयः – ०३:००-०६:०० |
| दिनाङ्कः – ३०-११-२०१६ | सन्दर्भग्रन्थः – बृहज्जातकम् | |

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ अधोलिखितेषु कयोश्चिद् द्वयोः ससन्दर्भं व्याख्यां कुरुत। ०८**

(१) मूर्तित्वे परिकल्पित: शशभृतो वर्तमापुनर्जन्मनां
मात्मेत्यात्मविदां क्रतुश्च यजतां भर्तामरज्योतिषाम्।
लोकानां प्रलयोद्भवस्थितिविभुश्चानेकधा य: श्रुतौ
वाचं न: स दधातु नैककिरणस्त्रैलोक्योदीपो रवि:॥

(२) क्रुर: सौम्य: पुरुषवनिते ते चरागद्विदेहा:
प्रागादीशा: क्रियवृषनृयुक्कर्कटा सत्रिकोणा:।
मार्तण्डेन्द्वोरयुजि समभे चन्द्रभान्वोश्च होरे
दृक्काणा: स्यु: स्वभवनसुतत्रित्रिकोणाधिपानाम्॥

(३) रक्त: श्वेत: शुकतनुनिभ: पाटलो धुम्रपाण्डु- श्चित्र: कृष्ण: कनकसदृश: पिङ्गल: कर्बुरश्च।
बभ्रु: स्वच्छ: प्रथमभवनाद्येषु वर्णा: प्लवत्वं स्वाम्याशाख्यं दिनकरयुताद्भाद् द्वितीयं च वेशि॥

**प्रश्नः – २ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं निबन्धयत। ०८**

(१) ग्रहयोनिप्रभेदाध्यायस्य सारांश: (२)राशिनवमांशद्वादशांशाधिपानां विवर्णनम

**प्रश्नः – ३ निम्नलिखितयोः कस्यचिदेकस्य उपरि टिप्पणीं लिखत। ०२**

(१) राशिनां स्वरुपवर्णनम् (२) ग्रहाणां स्थानदिग्बलञ्च

**प्रश्नः – ४ अधोलिखितेषु कयोश्चिद् द्वयोः अतिलघूत्तरं लिखत। ०२**

(१) सूर्यस्य शत्रू ग्रहौ कौ? (३) तरुणावस्था कस्य ग्रहस्य भवति ?
(२) चतुरस्त्रस्थाने कति चरणात्मिका दृष्टि: भवति? (४) दुश्चिक्यशब्दस्य कोऽर्थ: ?

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ५ अधोलिखितेषु कयोश्चिद् द्वयोःससन्दर्भं व्याख्यां कुरुत।। ०८**

(१) यथास्तराशिर्मिथुनं समेति तथैव वाच्यो मिथुनप्रयोग:।
असद्ग्रहालोकितसंयुतेऽस्ते सरोषइष्टै: सविलासहास:॥

(२) युग्मे चन्द्रसितावथौजभवने स्युर्ज्ञारजीवोदया
लग्नेन्दू नृनिर्रीक्षितौ च समगौ युग्मेषु वा प्राणिन: ।
कुर्युस्ते मिथुनं ग्रहोदयगतान् द्वयङ्गांशकान् पश्यति
स्वांशे ज्ञे त्रितयं ज्ञगांशकवशाद्युग्मं त्वमिश्रैसमम्॥

(३)  सौरीं प्राप्य खरोष्ट्रपक्षिमहिषीवृद्धाङ्गनावाप्तय:
श्रेणीग्रामपुराधिकारजनिता पूजा कुधान्यागम॥
श्लेष्मेर्ष्यानिलकोपमोहमलिनव्यापत्तितन्द्रीश्रमा
भृत्यापत्यकलत्रभर्त्सनमपि प्राप्नोति च व्यङ्गताम्

**प्रश्नः – ६ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं निबन्धयत। ०८**

(१)  निषेकाध्यायस्य सारांश:  (२) अरिष्टाध्यास्य सारांश:

**प्रश्नः – ७ निम्नलिखितेषु टिप्प्पणीद्वयं लिखत। ०४**

(१)  गर्भसम्भवासम्भवज्ञानम्  (३) लग्नायुर्दशाप्रमाणम्

(२)  मातृत्यक्तजातकस्य मृत्युयोग  (४) धनागमज्ञानम्

**प्रश्नः – ८ अधोनिर्दिष्टेषु पञ्चानाम् अतिलघूत्तरं यच्छत। ०५**

(१)  निषेकशब्दस्य कोऽर्थ:?  (५) कीटसंज्ञा कस्य लग्नस्य भवति?

(२)  जन्मकाले गर्भिण्या: मृत्युयोग: कदा भवति?  (६) रिपुस्थानं किम्?

(३)  "जारजात्" शब्दस्य कोऽर्थ:?  (७) बृहज्जातकग्रन्थस्य लेखक: क: ?

(४)  युगलबालकस्य जन्म: कदा भवति?

**तृतीयान्विति: (Unit-3)**

**प्रश्नः – ९ अधोलिखितेषु कयोश्चिद् द्वयोःससन्दर्भं व्याख्यां कुरुत।। ०८**

(१)  वृषे सेन्दौ लग्ने सवितृगुरुतीक्ष्णांशुतनयै:
सुहृज्जायाखस्थैर्भवति नियमान्मानवपति:।
मृगे मन्दे लग्नेसहजरिपुधर्मव्ययगतै:
शशाङ्काद्यै: ख्यात: पृथुगणयशा पुङ्गलपति:॥

(२) मेषुरणायतनुगा शशिमन्दजीवा  ज्ञारौ धने सितरवी हिबुके नरेन्द्रम्।
वक्रासितौ शशिसुरेज्यसितार्कसौम्या  होरासुखास्तशुभखगाप्तिगता प्रजेश:॥

(३) अधमसमवरिष्ठान्यर्क्केन्द्रादिसंस्थे  शशिनि विनयवित्तज्ञानधीनैपुणानि।
अहनि निशि च चन्द्रे स्वेऽधिमित्रांशके वा  सुरगुरुसितदृष्टे वित्तवान्स्यात्सुखी च॥

**प्रश्नः – १० अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं निबन्धयत। ०८**

(१)  चन्द्रयोगाध्याय:  (२) राजयोगाध्यायस्य विषया:

**प्रश्नः – ११ निम्नलिखितेषु टिप्प्पणीद्वयं लिखत। ०४**

(१)  समुद्रचक्रयोगौ  (३) राजयोककारकग्रह:

(२)  युपशरशक्तिदण्डयोगा:  (४)  दामिनीपाशकेदारशूलयोगा

**प्रश्नः – १२ अधोनिर्दिष्टेषु पञ्चानाम् अतिलघूत्तरं यच्छत। ०५**

(१)  उपचयभावा: के ?  (५) अनफायोग: कदा भवति ?

(२)  अधियोगस्य फलं किम्?  (६) पाशयोग: कदा भवति ?

(३)  पणफरस्थानानि कानि ?  (७) युगनामकयोग: कदा भवति?

(४)  सुनफायोग: कदा भवति ?

***